वर्ष-०९, जनवरी-जून-२०१५
अङ्कौ-६३-६४ (संयुक्ताङ्कौ)

ISSN 2321-1342

सम्पादकः
डॉ.प्रफुल्लः पुरोहितः

# देवसायुज्यम्

संस्कृत-त्रैमासिक-पत्रिका,

वार्षिक रु-१५०

Scanned with CamScanner

संपादक : डॉ. प्रफुल्ल पुरोहितः


## परामर्शकमण्डलम्

डॉ. जयन्तीलाल के. भट्टः
प्रो. राजेन्द्र नाणावटी
प्रो. उमा देशपांडे
प्रो. जयदेव ए. जानी
श्रीहंसकुमार मांकड
डॉ. रमणलाल पाठक



| प्रकाशकः | मुद्रक |
|---|---|
| डॉ. प्रफुल्ल पुरोहितः<br>एल-२, न्यू विकक्रम बाग, लेकचरर्स कवार्टर्स, ८<br>एम.एस.यु. प्रतापगंज, वडोदरा-२. मो. ९३७६२१९४७७ | Disha Art<br>New Sama Road, Vadodara-390 024<br>M : 9925382863 |


## अनुक्रमणिका


| | | |
|---|---|---|
| १. मन्त्रः | | २ |
| २. वनस्य विस्मरणम् | सतीशः गज्जर् | ३ |
| ३. गुरुगौरवस्तवनम् | प्रो.नरेन्द्र पण्डया | ४ |
| ४. आत्यन्तिकदुःखनिवृत्तिरूपाः आगमाः | प्रो.वी.एस.विष्णुभट्टाचार्युलु | ७ |
| ५. महाकविभासः तथा संस्कृतनाटकानि | डॉ.अमृतः भोगायता | १२ |
| ६. पाणिनेः पश्चात् नवक्षनमीणर्म्रौनककुमारः | डॉ. | १३ |
| ७. अर्वाचीनकाव्ये विश्वबन्धुत्व-भावना। | प्रा.डॉ.पङ्कज त्रिवेदी | १६ |
| ८. एकविंशशताब्द्याः नवीनविधा विनोदकणिका | निधि चौधरी, शोधच्छात्रा | १८ |
| ९. अर्वाचीनसंस्कृतसाहित्यस्य एका विधा | योगिता शर्मा, शोधच्छात्रा | २२ |
| १०. सर्वेषां राजतन्त्राणां लोकतन्त्रं विशिष्यते | डॉ.भरत के.वलाणी | २८ |
| ११. "संस्कृतपत्रकारित्वायां गुजरातराज्यस्य गौरवम्" | डॉ. जतीन पुरखा | ३० |
| १२. श्रीमद्भगवद्गीता | डॉ.प्रफुल्लः पुरोहितः | ३२ |
| १३. गान्धिनः सर्वमेतत् | डॉ.अमृतः भोगायता | ३४ |
| १४. ॥ गुर्जरप्रदेशेकर्णावत्याम्सम्पन्नम् व्याससाबरमतीज्ञानसरितासम्मेलनम् ॥ | प्रो.डॉ.कमलेशकुमारः छ.चोक्सी | ३५ |
| १५. आत्मदीपो भव | प्रा.डॉ.मनसुख पटोलिया | ३६ |




Scanned with CamScanner

# गुरुगौरवस्तवनम् ।

श्रीमन्तः सरसमधुरसरलसुरभारतीसम्भाषणाकृष्टाखिलजनसमुदायहृदयाः सदयस्वभावाभिमण्डितशीलाः संस्कृतसंस्कृतिसमाराधनैकधनाः गुजरातमहीमण्डनायमानाः संस्कृतसम्पोषणसंवर्धनसमुत्थानसन्दर्शनदीपदण्डायमानाः वार्धक्येऽपि दिवानिशमप्रमादं सुरभारतीं सेवमानाः समेधयन्तः पू.श्री.डाह्याभाईपञ्चोलीशास्त्रिचरणाः आयुषः एकोननवतिशरदां पूर्णतायां नवतितमवर्षे प्रविशन्तः सन्तः सश्रद्धं सगौरवं सभाज्यन्तेतराम् ।

नवतितमवर्षस्य प्रवेशे गुरुवासरे ।
गुरूणां गौरवं किञ्चिद्वक्ष्ये सन्मार्गदर्शकम् ॥ १॥

सन्तो वदान्या गुणराशिधन्या वेदैकनिष्ठा सहजप्रतिष्ठाः।
पञ्चोलिनः साधुसभासभाजिताः सन्मार्गसन्दर्शनशीलशालिनः॥ २ ॥

वरेण्यशीला सुरवाक्शरण्याः ब्रह्मर्षिवर्याः विबुधप्रियाश्च ।
अनारतं भारतभूसमर्चने दत्तावधाना विलसन्ति विज्ञाः॥ ३ ॥

मेघो वर्षति वारि भाति धरणी धन्या प्रसन्नाऽर्द्रिता
धान्याढ्या सुखदा सदा शुभयुता सम्मोदते सत्प्रजा ।
पञ्चोलिप्रियवारिदस्य सुतरां ज्ञानाख्यसंवर्षणं
हृद्यां भारतभूमिमार्यचरितां सम्पोषयद्राजते ॥ ४ ॥

तरुवरसदृशी कृतिस्तवदीया सततमहो परमोपकारशुक्ला ।
गुरुवर विलसत्यहो धरण्यां दृशियुगलं किल शीतलं करोति ॥ ५॥

भवतु जगति विद्ववदग्रणीनां दृढतरशास्त्रजुषां गणः सुगर्वः।
तव तु किल सुपर्ववाक्सुेक्षा वदति मुदा कृतिनां वरेण्यतां नः॥ ६ ॥

सरितां गतयः समुद्रमाप्तुं प्रतिपलमेव भवन्ति सत्वरेण ।
बहुविधजनता गुरुं शरण्यं व्रजति मुदा करुणाधनं बहुज्ञम् ॥ ७॥

श्रीमतामपि च धीमतां चयो यस्य सन्निधिमवाप्य धन्यताम् ।
आत्मनो मनुत आदरादरं भाति भव्य इह भूतिमान् गुरुः॥ ८॥

यस्तरुं श्रयति मानवो भुवि प्राप्नुते स फलमर्थितं महत् ।
छाययाऽपि य लभेत् कृतार्थतां नाऽस्ति तत्र विचिकित्सितं क्वचित् ॥ ९ ॥

पूर्वं नृपा रघुकुले ह्यभवन् वदान्याः वृद्धाः गुणैश्च कृतिभिः जरसा विनाऽपि ।
पञ्चोलिवर्य इह भाति वदन् सभासु पञ्चाशीतेरहमिहाऽस्मि शिशुः प्रसन्नः॥ १०॥



Scanned with CamScanner

शब्दायमानस्य सुभास्वमुष्य वचांसि माधुर्यरसामृतानि ।
पीत्वा प्रसन्नानि मुखाम्बुजानि वै सभासदां सुसभाजयन्ते ॥ १२॥
वृद्धत्त्वसत्त्वेऽपि समैः प्रभावैः स्वभावतो यस्य शिशुत्वरूपम् ।
दृष्ट्वा स्मरामो गिरिमाष्टवक्री तस्याऽस्ति चेष्टा किल बालवद्धि॥ १३ ॥
छात्रत्त्वतो यस्य गुरुः प्रसन्नः पुत्रत्त्वतो यस्य पिता प्रसन्नः।
गुरुत्त्वतो यस्य भवन्ति नूनं शिष्याः प्रसन्नाः सकला जगत्सु ॥ १४ ॥
यत्कर्मणा भक्तिभरेण विद्यया संस्कारवत्या च गिरा रसालया ।
सन्तो महान्तो भगवान् परमेश्वरः नूनं प्रसीदन्ति विचक्षणस्य वै ॥ १५ ॥
सरस्वत्याः पुत्रो भवति वरदो यः सविनयः वरेण्यः शिष्याणाममलसुखाचैकशरणः।
अलङ्कारो भूम्या अमल इह पञ्चोलिविबुधः कथङ्कारं वाचां भवतुं षियोऽनेकगुणवान् ॥ १६॥
डायाभाइमहोदयः सकरुणः सत्सेवनीयो गुरुः
माङ्गल्यं दशदिक्षु वै सुरगिरां सम्पोषणैः सर्वथा ।
सन्तन्वन् किल राजते नटपुरे चारुप्रदेशे मणिः
शास्त्राणां डमरुं निनाद्य मधुरं नैकार्थगाम्भीर्यवत् ॥ १७ ॥
शास्त्रैकनिष्ठः सहतप्रतिष्ठः गुणैर्वरिष्ठः सहजप्रबोधः।
कालानुरोधी प्रतिभानवद्यो वन्द्यो विभात्येष गुरुर्गरीयान् ॥ १८ ॥
इन्दुवद्विमलशीतलकान्तिः शान्तदान्तधृतिमद्धृदयार्यः।
वन्दनीयचरितः समुदारः संस्कृतं समवतीह रसायाम् ॥ १९॥
गिराराडीव निश्चलभावमूर्ध्वः बुधपूजितपादपयोजयुगोऽर्च्यः।
गुणमण्डितचारुपवित्रचरित्रः गुरुराडिह राजति धीधनधुर्यः॥ २०॥
वसुधेव विशालमना मनुमार्गी दिशि वा विदिशि प्रथितप्रतिभाभः।
करुणावरुणालय शीलसुभावो भुवि भासत एष हरिहर्रिभक्त्या ॥ २१ ॥
पञ्चोलिवंशाम्बुजाभास्करस्य तेजोनिधे रश्मिसमूहरूपाः।
शिष्या वदान्याः परमप्रकाशाः विश्वं स्वविद्यातपसा तपन्ति ॥ २२ ॥
ब्रह्मर्षिधामामलविद्यया यद् विभाति भूमौ दिवि वा रसायाम् ।
विद्याप्रवाहोऽस्य परं पवित्र गङ्गौघवद् वै त्रिजगत्पुनाति ॥ २३ ॥
वरवरदवरेण्यैः वन्द्यचारूच्चशीलैः ऋषिमुनिभिरिदं वै धाम पूतं पदाब्जैः।
वलसति वरणीयं धाम धन्यं धरायां श्रुतिमतिगतिशान्तिदान्तिमत्सेवनीयम् ॥ २४ ॥



Scanned with CamScanner

राजहंसा यथा मानसं शारदेऽनेहसि व्रजन्ति वै सम्प्रसिद्धं विदाम् ।
नैकमानदास्तथोपाधयः सादरं डायाभाइशास्त्रिणं संश्रन्यते सदा ॥ २५ ॥
ग्रन्था अनेके रचिता गुणज्ञैः सारं समुद्धृत्य हि शास्त्रवार्धेः।
बुधाश्च शिष्याश्च महद्भिरित्थं सम्बोधिताश्चोपकृताश्च भूरि ॥ २६ ॥
यत्कारुण्यकटाक्षतः प्रभवतिच्छात्रः स्वपाठे रतः
वैदुष्यं समवाप्तुमेवमचिरं चेतश्चमत्कारकम् ।
यत्सान्निध्यवशादशान्तहृदयःशान्तिं व्रजेत्सत्वरं
डायालालमनर्घ्यरत्नममलं सन्तं नुमस्तं वयम् ॥ २७ ॥
पाठशालां च गोशालां शिवदेवालयं तथा ।
निर्माय रचिता नूनं त्रिवेणी नटधामनि ॥ २८ ॥
पाठशाला ज्ञानवेणी भक्तिवेणी च मन्दिरम् ।
गोसेवा कर्मवेणी वै त्रिवेणी हरितोषणी ॥ २९ ॥
सन्तरामकरुणामृतालुप्तं रामदासगुरुगौरवान्वितम् ।
ब्रह्मधाम भवता विधाय यत् वेदशास्त्रपरिरक्षणं कृतम् ॥ ३०॥
कीर्तिर्वः परमं पवित्रचरिता सत्त्वोद्भवा पुण्यदा
सत्कर्मप्रथितप्रभावमहिमा राराज्यते भास्वरा ।
पूर्णायां सितपक्षपूर्णशशिवच्छुभ्रा प्रसन्नप्रभा
लोकानां तनुते मुदं नयनयोः दृष्टा स्मृता सेविता ॥ ३१ ॥
गुरुस्तरुर्गुरुः सरित् गुरुः सरित्पतिस्ततः
गुरुर्धरा गुरुर्गिरीः गुरुस्तथा धनञ्जयः।
गुरुर्नभो गुरुर्धनो गुरुर्हरिः गुरर्हरः
गुरुत्वमत्र सर्वतो व्यापकं विराजते ॥ ३२ ॥
गरूणां गुणसंख्यानं यः पठेद्गुरुगौरवम् ।
तस्यापि सम्प्रवर्धेत् गौरवं भुवि भावुकाः॥ ३३ ॥

इति श्रीमद्भागवतविद्यापीठस्थश्रीवरतन्तुसंस्कृतमहाविद्यालयस्य प्राचार्यचरेण श्रीसोमनाथसंस्कृतयुनिवर्सिटीकोलेजप्राचार्येण पण्ड्योपाह्वेन लालजीभाईसूनुना डॉ.नरेन्द्रकुमारेण विरचितं विद्यावाचस्पतिपरमपूज्यश्रीडाह्याभाईशास्त्रिगुणगणगौरवगुम्फितं गुरुगौरवस्तवनम्।



Scanned with CamScanner